Click here to go back

Shukra kavacham -Hindi

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ शुक्र कवचं

ओं अस्य श्री शुक्र कवच महामंत्रस्य भारद्वाज ऋषिः। अनुष्टुप्छंदः। भगवान् शुक्रो देवता। ह्रां बीजं। ह्रीं शक्तिः। ह्रूं कीलकं। मम शुक्र ग्रहप्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) भां अंगुष्ठाभ्यां नमः। भीं तर्जनीभ्यां नमः। भूं मध्यमाभ्यां नमः। भैं अनामिकाभ्यां नमः। भौं कनिष्ठिकाभ्यां नमः। भः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) भां हृदयाय नमः। भीं शिरसे स्वाहा। भूं शिखायै वषट्। भैं कवचाय हुं। भौं नेत्रत्रयाय वौषट्। भः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) शुक्रं चतुर्भुजं देवं अक्षमाला कमंडलं। दंडहस्तं च वरदं ध्युतिजालसु शोभितं॥ शुक्लांबरधरं पूज्यं शुक्लगंधानुलेपनं। वज्राभरणसंयुक्तं चैव किरीटमकुटोज्वलं॥ श्वेताश्वरथारूढं मेरुं चैव प्रदक्षिणं। मृणाळकुंदेंदुपयो हिमप्रभं पीतांबरं स्निग्धवक्षमालिनं। समस्त शास्त्र शृति तत्वदर्शनं द्यायेत्कविं वांभितवस्तुसिद्धये॥ (अथ कवचं) शिरो मे भार्गवः पातु पालं पातु ग्रहाधिपः। नेत्रे दैत्यगुरुः पातु श्रोत्रे श्रीचंदनद्युतिः॥ पातु मे नासिकां काव्यो वदनं दैत्यवंदितः। रसनाम शनापातु कर्णं श्रिकंठभक्तिमान्॥ भुजौ तेजोनिधि पातु वक्षो योगविदां वरः। अक्षमालाधरो रक्षेत्कुक्षि मे च कृपाकरः॥ कटिं मे पातु विश्वात्मा ऊरू मे सुरपूजितः। जानुनी तं भृगुः पातु जंघे मे देवताचरः॥ गुल्फौ गुणानिधिः पातु पादौ मे पांडरांबरः। सर्वाण्यंगानि मे पातु शुक्रः कविर्हर्निशं। (फलश्रुतिः) य इदं कवचं दिव्यं पठेत् श्रद्धा समन्वितः। न तस्य जायते पीडा भार्गवस्य प्रसादतः॥ इति स्कांद पुराणे शंकर संहितायां शुक्र कवचं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back